# ५३. यात्रावर्णनम्

क्तवतु द्विवचन प्रयोगः

शारदा - किं दर्शनमेव नासीत् भवतोः ?

पङ्कजा - आवां दशदिनानि न आस्व । उत्तरभारतप्रवासार्थं गतवन्तौ । त्वं किं मम गृहं आगतवती आसीत् ?

शारदा - अहं भवत्याः गृहं द्विवारम् आगतवती आसम् । परं भवन्तौ न आस्ताम् । कुत्र कुत्र गतवन्तौ ? किं किं दृष्टवन्तौ ?

पङ्कजा - आवाम् इतः वाराणसीं गत्वा विश्वनाथस्य दर्शनं कृतवन्तौ । वाराणासीतः प्रयागं गतवन्तौ । प्रयागतः मथुरां गतवन्तौ । मथुरातः वृन्दावनं गतवन्तौ ।

शारदा - वृन्दावने गिरिजा मिलितवती वा ?

पङ्कजा - आम् ! वृन्दावने गिरिजा मिलितवती । आवां द्वौ अपि तस्याः गृहं गतवन्तौ । सायं अहं गिरिजा च आपणं गतवत्यौ । मम पतिः गिरिजायाः गृहे एव आसीत् । अनन्तरदिनं पुनः वृन्दावनतः अयोध्यां गतवन्तौ । तत्र श्रीराममन्दिरं गत्वा पुनः वाराणसीं गतवन्तौ ।

शारदा - किमर्थं पुनः वाराणसीं गतवन्तौ ?

पङ्कजा - मम पतिः पुनः विश्वनाथदर्शनं कृत्वा गच्छावः इति उक्तवान्। अतः पुनः वाराणसीं गत्वा आगतवन्तौ।

शारदा - अरे ! महती यात्रा ननु ?

पङ्कजा - आम्, अतः दशदिनेभ्यः गृहे अव्यवस्था । त्वं गमनसमये प्रसादं नय ।